**संस्कृतवार्ता:**

दिनाङ्क : 01.08.2025 सायम् - 06:20

## आदौ-मुख्यवार्ता:

- भारतीयनिर्वाचनायोगेन अद्य उपराष्ट्रपतेः निर्वाचनाय तिथेः घोषणा विहिता । सितम्बर-मासस्य नवमे दिनाङ्के मतदानं भविष्यति।
- विभिन्नविषयेषु विपक्षस्य कोलाहलात् अनन्तरं संसदः उभयसदनयोः कार्यजातं दिवसपर्यन्तं स्थगितं सञ्जातम् ।
- राष्ट्रपतिः द्रौपदी मुर्मू, आइ. आइ. टि.-आई. एस्. एम्. धनबाद् इत्यस्य स्नातकविद्यार्थिनः 2047 तमे वर्षे विकसित-भारतस्य लक्ष्यं साधयितुं उत्प्रेरकरूपेण कार्यं कर्तुं प्रार्थयत्।
- भारतपाकिस्तानयोः मध्ये संघर्षविरामविषये सर्वकारेण कस्यचिदपि अन्यदेशस्य मध्यस्थता पूर्णतया निराकृता श्रीकीर्तिवर्धनसिंहेन उक्तं यत् उभयोः देशयोः मध्ये एव वार्ता संजाता आसीत्।
- मकाओ ओपनबैडमिण्टन्प्रतियोगितायां लक्ष्यसेनः अद्य ईस्ट्-एशियन्-गेम्स्-डोम्-इत्यत्र चीनदेशस्य झु-ज़ुवान्-चेन् इत्येनं 21-14,18-21,21-14 च अङ्कैः पराजित्य मकाउ-ओपन्-क्रीडायाः पुरुष-एकलवर्गस्यस्य उपान्त्यचक्रं प्राविशत्।

## अथ वार्ताः विस्तरेण

### उपराष्ट्रपति-निर्वाचनम्

भारतीयनिर्वाचनायोगेन अद्य उपराष्ट्रपतेः निर्वाचनाय तिथेः घोषणा विहिता । एतदर्थं सितम्बर-मासस्य नवमे दिनाङ्के मतदानं भविष्यति। गतमासे उपराष्ट्रपतिः श्रीजगदीप धनकरः स्वपदात् त्यागपत्रं दत्तवान् आसीत्। एतद्धि सप्तदशतमम् उपराष्ट्रपतिनिर्वाचनं भविष्यति। उपराष्ट्रपतिः निर्वाचकमण्डलेन निर्वाचितः भवति यस्मिन् लोकसभायाः राज्यसभायाः च सदस्याः भवन्ति। निर्वाचन-आयोगस्य अनुसारं अगस्त-मासस्य सप्तमे दिनाङ्के अधिसूचनायाः प्रकाशनं भविष्यति। अभ्यर्थिनः अगस्त-मासस्य एकविंशतिदिनाङ्कपर्यन्तं नामाङ्कनं कर्तुं शक्नुवन्ति। द्वाविंशे दिनाङ्के परीक्षणं भविष्यति, तथा च निवृत्तेः अन्तिमतिथिः पञ्चविंशतिः भविष्यति। मतानां गणना, परिणामानां घोषणा च मतदानस्य दिने एव भविष्यति।

### संसत्स्थगनम्

विभिन्नविषयेषु विपक्षस्य कोलाहलात् अनन्तरं संसदः उभयसदनयोः कार्यजातं दिवसपर्यन्तं स्थगितं सञ्जातम् । राज्यसभायाः कार्यम् पूर्वं द्वादशवादनपर्यन्तम् पश्चात् च सम्पूर्णदिनाय स्थगितम् । अपराह्ले 12 वादने प्रथमस्य स्थगनस्य अनन्तरं यदा राज्यसभायाः कार्यजातं समारब्धं तदा विपक्षस्य सदस्याः पुनः बिहारराज्ये निर्वाचक-सूच्यां विशेष-गहन-संशोधनस्य विषये चर्चासहितेषु विभिन्नेषु विषयेषु घोषान् कर्तुं प्रारब्धवन्तः। ततः परं पीठासीन-अधिकारी श्रीघनश्याम-तिवारी इत्येषः प्रश्नोत्तरकालं चालयितुं प्रायतत, परन्तु विपक्षस्य कोलाहलात् कार्यजातं विघ्नितं जातम्। यदा कोलाहलः अन्ववर्तत तदा सभापतिः सभां दिनपर्यन्तं स्थगितवान्। कोलाहलस्य मध्ये, केन्द्रीय-इलेक्ट्रानिक्स् तथा ऐ. टि. मन्त्रिणः अश्विनी वैष्णवः डिजिटल्-व्यक्तिगत-दत्तांश-संरक्षणस्य, डी. पी. डी. पी. अधिनियमः-2023 इत्यस्य कार्यान्वयनसम्बद्धस्य प्रश्नस्य उत्तरम् अददात्।

तत्पूर्वं, प्रातः 11 वादने यदा सभायाः कार्यं प्रारब्धं तदा उपसभापतिः श्रीहरिवंशः बिहारराज्ये मतदातृ-सूच्यां विशेष-गहन-संशोधनस्य विषये चर्चां कर्तुं विपक्षस्य आग्रहस्य विषये, अवदत् यत् सः अस्मिन् विषये चर्चां कर्तुं न अनुमन्यते यतः निर्वाचन-आयोगः संवैधानिकः निकायः अस्ति अपि च विषयः अपि न्यायालये विचाराधीनः अस्ति इति। सः विपक्षस्य सदस्यान् अपि प्रार्थयत् यत् ते पुनः स्वस्थानानि गत्वा सभायाः कार्यजातं सम्यक्तया चालयितुं सहयोगं कुर्वन्तु इति। यदा कोलाहलः अन्ववर्तत तदा उपसभापतिः मध्याह्ने 12:00 पर्यन्तं सभां स्थगितवान्।

विभिन्नेषु विषयेषु विपक्षस्य कोलाहलात् लोकसभायाः कार्यजातं अपि बाधितम् अभवत्। अपराह्ले 2 वादने प्रथमस्य स्थगनस्य अनन्तरं यदा सभा पुनः समागता, तदा विपक्षदलानां सदस्याः बिहारराज्ये एस्. आइ. आर्. विषये चर्चां याचितुम् घोषान् कर्तुम् आरभन्त। अध्यक्षस्थाने स्थितेन कृष्णप्रसाद-तेन्नेटी इत्यनेन गोवा-राज्यस्य विधानसभाक्षेत्रेषु अनुसूचितजनजातीनां प्रतिनिधित्वस्य पुनःसमायोजनस्य विषये चर्चायै अनुमतिं दातुं विरोधिनः

सदस्याः प्रार्थिताः। केन्द्रीय-विधि-न्याय-मन्त्री अर्जुनराम-मेघवालः अपि अकथयत् यत् एतत् अनुसूचितजनजातीनां हितसम्बद्धम् महत्त्वपूर्णं विधेयकम् अस्ति, परन्तु विपक्षस्य सदस्याः कार्यजातं बाधितवन्तः इति। यदा एतत् अन्ववर्तत तदा सभा दिवसपर्यन्तं स्थगिता।

**कर्णाटक-दुष्कर्म-प्रकरणम्**

कर्णाटक-दुष्कर्म-प्रकरणे बेङ्गळूरुनगरस्य विशेषन्यायालयेन अद्य जे. डी.एस् इत्यस्य नेता तथा च पूर्वसंसदसदस्यः प्रज्वल-रेवन्ना दोषी इति निर्णीतः। अतिरिक्त-नगर-नागरिक-सत्र-न्यायाधीशः सन्तोष-गजानन-भट्टः रेवन्नां दुष्कर्मणः, यौन-उत्पीडनस्य, आपराधिक-भीतिप्रदर्शनस्य च दोषी इति अमन्यत। श्वः दण्डादेशः अपेक्षितः अस्ति, ।रेवन्नाद्वारा परिवारस्य परिचारिकिया सह वारंवारं दुष्कर्म कृतम् आसीत्, कोविड्-नवदश काले रेवन्ना इदं दुष्कृत्यम् आचरितवान् आसीत् ।

**राष्ट्रपतिः द्रौपदी मुर्मू,**

राष्ट्रपतिः द्रौपदी मुर्मू, आइ. आइ. टि.-आए. एस्. एम्. धनबाद् इत्यस्य स्नातकविद्यार्थिनः 2047 तमे वर्षे विकसित-भारतस्य लक्ष्यं साधयितुं उत्प्रेरकरूपेण कार्यं कर्तुं प्रार्थयत्। राष्ट्रपतिः द्रौपदी मुर्मू वर्या अद्य झारखण्डस्य धनबाद-नगरे भारतीय-प्रौद्योगिकी-संस्थानस्य-भारतीय-खनन-विद्यालयस्य (आई. आई. टि.-आई. एस्. एम्.) इत्यस्य चतुःपञ्चाशत्तमे दीक्षान्त-समारोहे भागम् अगृह्णात्। राष्ट्रपतिः तान्त्रिकसंस्थायाः स्थापनायाः शतस्य वैभवयुतवर्षाणां स्मरणार्थं विशिष्टं पोस्टल्-स्टाम्प् अपि प्रकाशितवती।

संस्थायाः गौरवपूर्णस्य इतिहासस्य प्रशंसां कुर्वती राष्ट्रपतिः द्रौपदी मुर्मू इत्येषा उत्तीर्णान् छात्रान्, सरल-समाधानैः सह समस्यानां समाधानार्थं, संशोधनार्थं नवान्वेषणैः सह नूतन-प्रणालीं, प्रौद्योगिकीय-प्रगतिं च स्वीकर्तुं परामृष्टवती। सा अवोचत् यत् अत्याधुनिकप्रौद्योगिकीभिः सह बौद्धिक-अभियन्तॄणां निर्माणे आई. आई. टि. इत्यादिसंस्थाः महत्त्वपूर्णां भूमिकां निर्वोढुं शक्नुवन्ति, अपि च मानवजातिं प्रति सर्वे करुणामयाः, संवेदनशीलाः, सहानुभूताः च भवेयुः इति।

हरितभारतस्य निर्माणे, राज्यस्य, देशस्य, विश्वस्य च कृते प्रकृत्याः किमपि हानिं विना सुस्थिर-उपायान् अन्वेष्टुं च स्वकीय-तान्त्रिक-कौशलं उपयोक्तुं सा छात्रान् प्राचारयत्।राष्ट्रपतिः अवदत् यत् भारतस्य बृहत्तमा शक्तिः तस्य विशाल-मानवसंसाधनानि सन्ति इति।राष्ट्रपतिः सामान्यजनानां जनजातीयजनानां च समस्यानां समाधानार्थं प्रौद्योगिकी-उपयोगेन जनजातीय-उत्कृष्टता-केन्द्रस्य स्थापनार्थं संस्थायाः प्रयत्नान् अपि प्राशंसत। सा आदिवासिजनानां कृते नूतनप्रथाः प्रवर्तयितुं, डिजिटल्-शिक्षण-उपायान् प्रदातुं च संस्थानस्य दूरदृष्टिं अपि प्राशंसयत्। तत्पूर्वं राष्ट्रपतिः संस्थाने स्थापितस्य अटल्-नवान्वेषणकेन्द्रे सामुदायिक-नवान्वेषणविषये आदिवासि-महिलाभिः प्रदर्शितं प्रदर्शनम् अपि दृष्टवती। दीक्षान्तसमारोहे केन्द्रीय-शिक्षा-मन्त्री धर्मेन्द्र-प्रधानः, राज्यपालः सन्तोष-गङ्गवारः, झार्खण्ड्-राज्यस्य उच्च-शिक्षा-मन्त्री सुदिव्य-कुमारः च उपस्थिताः आसन्।

**सर्वकारमध्यस्थता**

सिन्दूराभियानस्य समये सैन्यकार्याचरणि स्थगयितुं वार्ता: प्रत्यक्षतया भारत-पाकिस्तानयोः च सशस्त्रसेनयोः मध्ये अभवत् इति विदेशराज्यमन्त्री कीर्तिवर्धनसिंहः अद्य लोकसभायां सूचितवान्। सः अवदत् यत् युद्धविरामस्य अनुरोधः पाकिस्तानेन आरब्धः, विद्यमानसैन्यमाध्यमैः च अभवत्। तृतीयपक्षस्य मध्यस्थतायाः विषये श्रीसिंहः अवदत् यत् भारतं पाकिस्तानेन सह सर्वान् विषयान् द्विपक्षीयरूपेण साधयति, तस्मिन् अमेरिकीराष्ट्रपतिना सह चर्चा अपि सम्मिलिता अस्ति। प्रस्तावितस्य एफ-35 युद्धविमानविक्रयस्य विषये मन्त्री स्पष्टं कृतवान् यत् औपचारिकविमर्शः नाभवत्।

**मकाओ ओपनप्रतियोगिता**

मकाओ ओपनबैडमिण्टन्प्रतियोगितायां लक्ष्यसेनः अद्य ईस्ट्-एशियन्-गेम्स्-डोम्-इत्यत्र चीनदेशस्य झु-जुवान्-चेन् इत्येनं 21-14,18-21,21-14 च अङ्कैः पराजित्य मकाउ-ओपन्-क्रीडायाः पुरुष-एकलवर्गस्यस्य उपान्त्यचक्रं प्राविशत्। सः निर्णायकस्पर्धायां स्थानं प्राप्तुं इण्डोनेशिया-देशस्य अल्वी फर्थन् इत्येतं विरुध्य क्रीडिष्यति

**।।इति वार्ता।।**